श्रीगणेशाय नमः

# देवी स्तुतिः

## ***devī stutiḥ***

देव्या हते तत्र महासुरेन्द्रे सेन्द्रास्सुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जविकासिताशाः ।। १

*devyā hate tatra mahāsurendre sendrāssurā vahnipurogamāstām,*
*kātyāyanīṃ tuṣṭuvuriṣṭalābhādvikāsivaktrābjavikāsitāśāḥ .1*

देवाः दीव्यतेर्द्योतनार्थस्य, शास्त्रोद्भासिताः इन्द्रियवृत्तयः । शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविक्यः तमोरूपाः इंद्रियवृत्तयः असुराः । तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ताः इति अन्योन्याभिभवोद्भवरूपः सङ्ग्रामः इव सर्वप्राणिषु प्रतिदेहं देवासुरसङ्ग्रामः अनादिकालप्रवृत्तः।। (श्रीशंकराचार्याः, छान्दोग्योपनिषत्, १-२-१)

*devāḥ, dīvyaterdyotanārthasya, śāstrodbhāsitāḥ iṃdriyavṛttayaḥ. śāstrīyaprakāśavṛttyabhibhavanāya pravṛttāḥ svābhāvikyaḥ tamorūpāḥ indriyavṛttayaḥ asurāḥ. tathā tadviparītāḥ śāstrārthaviṣayavivekajyotirātmāno devāḥ svābhāvikatamorūpāsurābhibhavanāya pravṛttāḥ iti anyonyābhibhavodbhavarūpaḥ saṅgrāmaḥ iva sarvaprāṇiṣu pratidehaṃ devāsurasaṅgrāmaḥ anādikālapravṛttaḥ (śrīśaṅkarācāryāḥ, Chandogyopaniṣat, 1-2-1)*

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ।। २

*devi prapannārtihare prasīda prasīda mātarjagato'khilasya,*
*prasīda viśveśvari pāhi viśvaṃ tvamīśvarī devi carācarasya. 2*

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थिताऽसि ।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये ।। ३

*ādhārabhūtā jagatastvamekā mahīsvarūpeṇa yataḥ sthitā'si,*
*apāṃ svarūpasthitayā tvayaitadāpyāyate kṛtsnamalaṅghyavīrye. 3*

त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमाऽसि माया ।
सम्मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।। ४

*tvaṃ vaiṣṇavī śaktiranantavīryā viśvasya bījaṃ paramā'si māyā,*
*sammohitaṃ devi samastametattvaṃ vai prasannā bhuvi muktihetuḥ. 4*

विद्यास्समस्तास्तव देवि भेदाः स्त्रियस्समस्तास्सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्का ते स्तव्यपरापरोक्तिः ।। ५

*vidyāssamastāstava devi bhedāḥ striyassamastāssakalā jagatsu,*
*tvayaikayā pūritamambayaitatkā te stavyaparāparoktiḥ. 5*

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते । स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ।। ६

*sarvasya buddhirūpeṇa janasya hṛdi saṃsthite,*
*svargāpavargade devi nārāyaṇi namo'stu te. 6*

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।। ७

*sarvamaṅgalamāṅgalye śive sarvārthasādhike,*
*śaraṇye tryambake gauri nārāyaṇi namo'stu te. 7*

* * * * *